# 1. संवादः

## 1.1 हट्टवार्ताः (गीता गच्छति हट्टम्)



मोहनः - गीते ! त्वं कुत्र गच्छसि ?

गीता - मोहन ! अहं हट्टं प्रति गच्छामि ।

मोहनः - गीते ! किमर्थम् ?

गीता - मोहन ! शाकं फलं च क्रेतुम् । अधुना त्वं कुत्र गच्छसि ।

मोहनः - गीते ! अधुना अहं गृहं प्रति गच्छामि ।

### शब्दार्थाः-

त्वम् = तुम

कुत्र = कहाँ

गच्छसि = जा रहे हो

हट्टं प्रति = बाजार की ओर

किमर्थम् = किसलिए

शाकम् = शाक

क्रेतुम् = खरीदने के लिए

अधुना = अब

गच्छामि = जाता हूँ

# 1.2 छात्रालापः



वासुदेवः - भोः मित्र ! त्वं कस्यां कक्षायां पठसि ?

सुरेशः - मित्र ! अहं षष्ठ्यां कक्षायां पठामि ।
त्वं कस्यां कक्षायां पठसि ?

वासुदेवः - अहं सप्तम्यां कक्षायां पठामि ।

सुरेशः - तव कक्षायाः आचार्यस्य किं नाम अस्ति ।

वासुदेवः - मम कक्षायाः आचार्यस्य नाम ज्ञानानन्दः अस्ति ।
तव कक्षायाः आचार्यस्य नाम?

सुरेशः - मम कक्षायाः आचार्यस्य नाम परमानन्दः अस्ति ।

वासुदेवः - तव कक्षायां कति छात्राः पठन्ति ?

सुरेशः - मम कक्षायां चत्वारिंशत् छात्राः पठन्ति ।
तव कक्षायाम् च ?

वासुदेवः - मम कक्षायां पञ्चाशत् छात्राः पठन्ति ।

## शब्दार्थाः -

कस्यां कक्षायाम् = किस कक्षा में, पठामि = पढ़ता हूँ, पठसि = पढ़ते हो, सप्तम्यां कक्षायाम् = सातवीं कक्षा में, कक्षायाः आचार्यस्य = कक्षा आचार्य का, कति = कितना, पठन्ति = पढ़ते हैं, चत्वारिंशत् = चालीस, पञ्चाशत् = पचास, पठन्ति = पढ़ते हैं ।

# 1.3 परिजनसंवादः



शीला - सखि ! तव किं नाम अस्ति ?

विमला - मम नाम विमला अस्ति ।
सखि ! तव किं नाम अस्ति ?

सुशीला - मम नाम सुशीला अस्ति ।

विमला - त्वं कुत्र वससि ?

सुशीला - अहं रायपुर आख्ये नगरे वसामि । त्वं च ?

विमला - अहं बिलासपुर आख्ये नगरे वसामि ।

सुशीला - तव पितुः किं नाम अस्ति ?

विमला - मम पितुः नाम श्री सुशीलकुमारः अस्ति ।
तव पितुः नाम ?

सुशीला - मम पितुः नाम चन्द्रकुमारः अस्ति ।

विमला - तव पिता किं कार्यं करोति ?

सुशीला - मम पिता कृषिकार्यं करोति । तव पिता ?

विमला - मम पिता अध्यापकः अस्ति ।

सुशीला - मम एका अग्रजा अस्ति । तव ?

विमला - मम द्वौ अनुजौ स्तः । अग्रजा न अस्ति ।

सुशीला - तव माता कीदृशी अस्ति ?

विमला - मम माता अति सरला अस्ति । तव माता ?

सुशीला - मम मातुः स्वभावः सरलः मधुरः च अस्ति ।

## शब्दार्थाः

वससि = रहते हो, आख्ये = नामक, वसामि = रहता हूँ, तव पितुः = तुम्हारे पिता का, मम पितुः = मेरे पिता का, करोति = करते है, अग्रजा = बड़ी बहन, द्वौ अनुजौ स्तः = दो भाई हैं, कीदृशी = कैसी, मम माता = मेरी माता, तव माता = तुम्हारी माता

# 1.4 मनोहरम् उद्यानम्

गोपालः - कृष्ण ! त्वं प्रातः काले कुत्र गच्छसि ?

कृष्णः - गोपाल ! अहं प्रातः काले उद्यानं प्रति गच्छामि ।

गोपालः - कृष्ण ! उद्याने कति वृक्षाः सन्ति ?

कृष्णः - गोपाल ! उद्याने अनेके वृक्षाः सन्ति ।

गोपालः - कृष्ण ! केषाञ्चित् वृक्षाणां नामानि वद ।

कृष्णः - गोपाल ! अशोकवृक्षाः, वटवृक्षाः,
निम्बवृक्षाः इत्यादयः बहवः वृक्षाः सन्ति।

गोपालः - कृष्ण ! त्वम् उपवने कथम् अनुभवसि ?

कृष्णः - गोपाल ! अहम् उपवने मनोहरम् अनुभवामि ।



## शब्दार्थाः

त्वम् = तुम

कुत्र = कहाँ

उद्यानं प्रति = उद्यान की ओर

बहवः = बहुत

केषाञ्चित् वृक्षाणाम् = कुछ वृक्षों के

नामानि = नामों को

कथम् = कैसे

अनुभवसि = अनुभव करते हो

मनोहरम् = सुन्दर

अनुभवामि = अनुभव करता हूँ ।

# 1.5 बुभुक्षिता लोमशा



पल्लवी - पूजे ! अहम् अद्य एकां लोमशाम् अपश्यम् ।

पूजा - पल्लवि ! त्वं तां लोमशां कुत्र अपश्यः ?

पल्लवी - पूजे ! अहं वने अपश्यम् ।

पूजा - पल्लवि ! सा लोमशा अति बुभुक्षिता आसीत् ।

पल्लवी - पूजे ! सा लोमशांक्षुधाशान्त्यर्थं वृक्षस्य उपरि भागे द्राक्षायाः फलानि दृष्ट्वा उत्पतति।

पूजा - पल्लवि ! परन्तु द्राक्षायाः फलानि अति उपरि आसन् ।

पल्लवी - पूजे ! सा लोमशा पुनः पुनः उत्पतति । परं द्राक्षायाः फलानि न प्राप्नोत् ।

पूजा - पल्लवि ! सा लोमशा कथयति- अहं द्राक्षायाः फलानि न खादामि । द्राक्षायाः फलानि अम्लानि सन्ति ।

## शब्दार्थाः

| | |
|---|---|
| एकां लोमशाम् = एक लोमड़ी को | अपश्यम् = देखा |
| बुभुक्षिता = भूखी | द्राक्षायाः फलानि = अंगूर के फल |
| उपरि = ऊपर में | आसन् = थे |
| उत्पतति = उछलती है | कथयति = कहती है |
| अम्लानि = खट्टे | सन्ति = हैं। |

## अभ्यासः

1. **निम्नलिखित संवादों को पढ़िए-**

मोहनः - गीते ! त्वं कुत्र गच्छसि ?

गीता - मोहन ! अहं हट्टं प्रति गच्छामि ।

मोहनः - गीते ! किमर्थम् ?

गीता - मोहन ! शाकं फलं च क्रेतुम् । अधुना त्वं कुत्र गच्छसि ?

मोहनः - गीते ! अधुना अहं गृहं प्रति गच्छामि ।

2. **रिक्त स्थानों की पूर्ति कीजिए -**

मोहनः - गीते ! त्वं कुत्र गच्छसि ।

गीता - मोहन ! ..............................................

मोहनः - गीते ! किमर्थम् ।

गीता - मोहन ! ..............................................

मोहनः - गीते ! अधुना अहं गृहं प्रति गच्छामि ।



### (ख) निम्नलिखित संवादों को पढ़िए-

गोपालः - कृष्ण ! त्वं प्रातः काले कुत्र गच्छसि ?

कृष्णः - गोपाल ! अहं प्रातः काले उद्यानं प्रति गच्छामि।

गोपालः - कृष्ण ! उद्याने कति वृक्षाः सन्ति ।

कृष्णः - गोपाल ! उद्याने अनेकाः वृक्षाः सन्ति ।

गोपालः - कृष्ण ! केषाञ्चित् वृक्षाणां नामानि वद ।

कृष्णः - गोपाल ! अशोकवृक्षाः, वटवृक्षाः, निम्बवृक्षाः इत्यादयः बहवः वृक्षाः सन्ति ।

गोपालः - कृष्ण ! त्वम् उपवने कथम् अनुभवसि ?

कृष्णः - गोपाल ! अहम् उपवने मनोहरम् अनुभवामि ।

### रिक्त स्थानों की पूर्ति कीजिए-

गोपालः - कृष्ण ! त्वं प्रातः काले कुत्र गच्छसि ?

कृष्णः - गोपाल ! ..........................................

गोपालः - कृष्ण ! उद्याने कति वृक्षाः सन्ति ?

कृष्णः - गोपाल ! ..........................................

गोपालः - कृष्ण ! केषाञ्चित् वृक्षाणां नामानि वद ।

कृष्णः - गोपाल ! ..........................................

गोपालः - कृष्ण ! त्वम् उपवने कथम् अनुभवसि ।

कृष्णः - गोपाल ! ..........................................

### (ग) निम्नलिखित संवादों को पढ़िए-

पल्लवी - पूजे ! अहम् अद्य एकां लोमशाम् अपश्यम् ।
पूजा - पल्लवि ! त्वं तां लोमशां कुत्र अपश्यः ।
पल्लवी - पूजे ! अहं वने अपश्यम् ।
पूजा - पल्लवि ! सा लोमशा अति बुभुक्षिता आसीत् ।
पल्लवी - पूजे ! सा लोमशा क्षुधाशान्त्यर्थं वृक्षस्य उपरि भागे द्राक्षायाः फलानि दृष्ट्वा उत्पतति ।
पूजा - पल्लवि ! परन्तु द्राक्षायाः फलानि अति उपरि आसन् ।
पल्लवी - पूजे ! सा लोमशा पुनश्च उत्पतति । परं द्राक्षायाः फलानि न प्राप्नोत् ।
पूजा - पल्लवि ! सा लोमशा कथयति- अहं द्राक्षायाः फलानि न खादामि । द्राक्षायाः फलानि अम्लानि सन्ति।

### रिक्त स्थानों की पूर्ति कीजिए-

पल्लवी - पूजे ! अहम् अद्य एकां लोमशाम् अपश्यम् ।
पूजा - पल्लवि ! ...........................................
पल्लवी - पूजे ! अहं वने अपश्यम् ।
पूजा - पल्लवि ! ............................................
पल्लवी - पूजे ! सा लोमशा क्षुधाशान्त्यर्थं वृक्षस्य उपरि भागे द्राक्षायाः फलानि दृष्ट्वा उत्पतति ।
पूजा - पल्लवि ! ............................................
पल्लवी - पूजे ! सा लोमशा पुनश्च उत्पतति । परं द्राक्षायाः फलानि न प्राप्नोत् ।
पूजा - पल्लवि ! .............................................

## अभ्यासः ''मोहन'' अकारान्त पुल्लिंङ्ग

| विभक्ति | एकवचन | द्विवचन | बहुवचन | कारकादि |
|---|---|---|---|---|
| प्रथमा | मोहनः | मोहनौ | मोहनाः | कर्त्ता |
| द्वितीया | मोहनम् | मोहनौ | मोहनान् | कर्म |
| तृतीया | मोहनेन | मोहनाभ्याम् | मोहनैः | करण |
| चतुर्थी | मोहनाय | मोहनाभ्याम् | मोहनेभ्यः | सम्प्रदान |
| पञ्चमी | मोहनात् | मोहनाभ्याम् | मोहनेभ्यः | अपादान |
| षष्ठी | मोहनस्य | मोहनयोः | मोहनानाम् | सम्बन्ध |
| सप्तमी | मोहने | मोहनयोः | मोहनेषु | अधिकरण |
| सम्बोधन | हे मोहन! | हे मोहनौ ! | हे मोहनाः ! | सम्बोधन |

| हिन्दी रूप | - | संस्कृत रूप | - | कारक |
|---|---|---|---|---|
| राम ने | - | रामः | - | कर्त्ता |
| राम को, के द्वारा | - | रामम् | - | कर्म |
| राम से | - | रामेण | - | करण |
| राम के लिए | - | रामाय | - | सम्प्रदान |
| राम से | - | रामात् | - | अपादान |
| राम का | - | रामस्य | - | सम्बन्ध |
| राम में | - | रामे | - | अधिकरण |
| हे राम | - | हे राम | - | सम्बोधन |

उपर्युक्त विभक्तियों को क्रमशः प्रथमा, द्वितीया, तृतीया आदि नामों से जाना जाता है । इससे कारक आदि का ज्ञान प्राप्त किया जाता है । संस्कृत में एकवचन, द्विवचन व बहुवचन का प्रयोग एक, दो, तीन एवं तीन से अधिक के लिए प्रयोग होता है ।

1. कारकों में सम्बन्ध और सम्बोधन कारक नहीं कहे जाते । चूंकि कारक के लिए क्रिया का सम्बन्ध कर्त्ता से होना चाहिए । अतः कहा गया है ''क्रिया जनकं कारकम्'' कारक क्रिया को उत्पन्न करता है ।
2. तृतीया करण कारक में णत्व विधान के अनुसार 'न' का 'ण' होता है जैसे रामेन न होकर रामेण होता है। इसी तरह षष्ठी बहुवचन में रामानाम् के स्थान पर रामाणाम् होता है । अन्य अकारान्त बालक का बालकेन, सोहन का सोहनेन होगा ।
3. ऊपर लिखे कारकों पर विचार किया जाय तो विविधता के बीच बहुत कुछ समानता है ।

    (अ) कर्त्ता और सम्बोधन में द्विवचन और बहुवचन के रूप

    (ब) कर्त्ता और कर्म में द्विवचन और बहुवचन के रूप में ।

    (स) करण, सम्प्रदान और अपादान में द्विवचन के रूप में ।

    (द) सम्बन्ध और अधिकरण में द्विवचन के रूप

    (थ) सम्प्रदान व अपादान में बहुवचन के रूप में ।

    निम्नांकित शब्दों के रूप ''मोहन'' के समान चलेंगें-
    राम, श्याम, बालक, देव, सोहन, गजानन, कृष्ण, छात्र, अश्व, मृग, शुक, गज आदि ।

PCJBLX